206
(20b)

1

श्रीमते रामानुजाय नमः। श्रीमल्लक्ष्मणयोगीन्द्रो कौतुकलिपिर्वादीभपञ्चाननः संसारार्णवतारकस्स्वरूपधास्त्वांघ्रिप्रपन्नान् जगत् सद्दिया
पराजन्मभूमिर्भिषगेष वादिवनसुरो भूगुरुः मायावादद्वाग्निरत्नपूरणो वर्वर्ति सर्वोपरि १ श्रीश्रीनिवासदासेन नत्वा श्रीवेङ्कटगु
रून् मायावादनिरासार्थं क्रियते शतदूषणी २ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यत्र मायावादिनोऽसजातीयादिभेदशू
न्यसन्मात्रमेवासीदिति निश्चिन्वन्ति तत्र प्रष्टव्यं तादृशाद्ब्रह्मणः सकाशात् कथं जगद्व्यापार इति मायाङ्गीकारेणेति चेत् किं तादृशे ब्रह्म
णि मायेति ज्ञानमिति न वा नचेद् सर्वज्ञत्वापत्तिः यः सर्वज्ञः सर्ववित् इत्यादिश्रुतिविरोधश्च जानातिचेन्नहि ज्ञातृत्वापत्ते निर्विशेषत्वभं
गश्च ज्ञानमात्रत्वे तस्य गुणत्वेन द्रव्याश्रितत्वे स्यात् द्रव्यमन्वेषणीयं अनाश्रितस्य तस्य लोकवेदयोरदर्शनात्। ननु तस्याः
सदसद्विलक्षणत्वेनानिर्वचनीयत्वान्नोक्तदोषप्रसङ्ग इति चेन्न। अजामेकां गोरनाद्यन्तवती मायादिश्रुतिभिर्निर्वचनीयत्वेन
त्वदुक्तस्यैवानिर्वचनीयत्वात् लोकेपि सर्वस्य पदार्थजातस्य सत्त्वेन वा असत्त्वेन वा प्रतीतिस्तद्विलक्षणस्य कस्याप्यभावात्। किंच मा
यावयुनं ज्ञानं मायया सततं वेत्ति प्राचीनकर्म प्रमाणात् क्वचिन्मायाशब्दस्य ज्ञानवाचित्वश्रवणात्। नहि मिथ्याभूतया तया यथा
र्थवेदनं संभवतीति। अन्यच्च न तेनहि प्रत्युक्तो नासदासीन्नो सदासीत्तदानीमित्यादिश्रुतिभिः सदसदनिर्वचनीयमज्ञानं प्रती
यत इति चेन्न अन्नादिश्रुतीनां निर्वचनीयवाचकत्वाभावात्। अतेतरविषयौ हि अन्यतरश्रवणः अतपि वेतावति
श्चकालमपि फलस्येदं ... तत्त्वात्। अन्यथा गोरनाद्यन्तवती स्यादि पूर्वोक्तश्रुतिविरोधापत्तेः नासदासीदित्या
दौ सदसच्छब्दौ चिदचिद्वाचिनौ ... तम आसीदित्यत्र वाक्ये नविरोधात्। श्रुत्यन्तरे तमः परे देव एकीभवतीति

श्री· २

दृश्यत्वादिः परमार्थः पुनरूपदेशापेक्षइति· अत्रनुरज्जुस्थानीयं यद्ब्रह्मतद्यानिरूपकस्यकस्याप्यभावात् दृष्टांता
संगतिरेवेति· अन्यच्च अज्ञानकल्पितः प्रपंचइतितवोक्तिः तदज्ञानं किंजीवनिष्ठं आहोस्विद्ब्रह्मनिष्ठं नताबज्जीवनिष्ठं
तस्यैवाज्ञानकल्पितत्वेनप्रपंचमध्यपातित्वात् नापिब्रह्मनिष्ठंतस्यज्ञानस्वरूपत्वप्रकाशत्वेनाज्ञानविरोधित्वात्
ज्ञानवाधित्वाभिमतत्वाच्च· ननुतदानीं मायायांब्रह्माभासयोगस्ततः संकल्पपूर्विकासृष्टिस्तदैक्षतवहुस्यामित्यादिश्रु
तेरितिचेन्नचिन्मात्रस्यारूपवतोब्रह्मणआभासयोगासंभवात्· अलोहितमच्छायमितिच्छायाप्रतिषेधश्रुतेश्च· नह्यरू
पवतआभासः क्वापिदृष्टः· ननुरूपरहितोप्याकाशस्याभासोदृश्यते जलादाविति चेन्न तस्माद्वाएतस्मादात्मनआकाशः संभूतइति
श्रुतेस्तस्यापिजन्यत्वेनरूपवत्त्वात् नीलंनभइतिप्रतीत्यनुपपत्तेश्च अन्यदपिपरिच्छिन्नस्यैवाभासदर्शनात् ब्रह्मणआभासांगीका
रेतस्यत्रिविधपरिच्छेदरहितस्यपरिच्छिन्नत्वापत्तेरपसिद्धान्तापत्तिःस्यात् ननुतत्त्वमस्यादिवाक्यैर्ब्रह्मणः सामानाधिकरण्यावग
तजीवैक्यानुपपत्तेरभेदएवांगीकार्यइतिचेन्न क्षरंप्रधानममृताक्षरंहरः क्षरात्मानावीशतेदेवएकः पतिंविश्वस्यात्मेश्वर
मित्यादिभेदप्रतिपादकश्रुत्यनुपपत्तेः अन्तःप्रविष्टः शास्ताजनानामित्यंतर्यामितयापिसामानाधिकरण्योपपत्तेस्त
च्छ्रुत्यस्यतेन त्वंतस्मैत्वंतस्मात्त्वमित्यादिविभक्तीनां सुपांसुलुगितिलोपादपिभेदएवकल्पनांगीक्रियते अन्यथाऽणोरणीयाव
जीविस्यादिभेदश्रुतिविरोधश्च ननुजीवेश्वरयोरौपाधिकोभेदस्तद्विषयाभेदश्रुतिरितिचेत्तत्रोपाधेः संसर्गःस्वतो
वान्यतोवेतिविकल्पः; स्वतश्चेदनिर्मोक्षप्रसंगः; अन्यतश्चेत्किंतदन्यत् अनाद्यविद्यैवेतिचेत्किंतत्रप्रमाणं अजा
मेकांप्रकृतिंपुरुषंचैवविद्ध्यनादी [illegible] तीतिवेदागतोस्मिमाञ्जोसर्वाभव ननुजीवब्रह्मणोः स्वरूपैक्यानुपप

२

तमःशब्दवाच्यायाः प्रकृतेः [illegible] सहैव एकीभावश्रवणात् तत्पुरीरत्वात्तस्या अपृथग्भावेनैकीभावः यस्तमः
शरीरमिमिश्रनेः श्रनोन [illegible] सदनिर्वचनीयाज्ञानगोचरोपीति २ अपि च यदि मायाविद्यायुक्तं सदेव जगत्कारणमभिमतं तर्हि स
दीभावप्रतिपादनासंगतिः [illegible] प्रतिपादनेन तु तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियते सर्वोपवास [illegible] जीवोवासनाभिः
स्वकर्मभिः अनाद्यविद्यावप्रागस्तित्वस्याभिनिवेशतः सृष्टिकाले पुनः पूर्ववासनामानसैः सह जायते पुनरप्येवं चरितं त्रमिवा
वपाइतिश्रुतिस्मृतिविरोधः अप्रकृतेः [illegible]गमकृतविप्रनाशप्रसंगश्चस्यात् तत्रजीवादीनां सूक्ष्मरूपत्वेन स्थितौ सिद्धसाध्यता किंच
मायाविद्याविभेदकल्पनं शुद्धसत्वप्रधाना माया मलिनसत्वप्रधाना अविद्येति चेत्स तुच्छगोष्ठीसमयः प्रमाणाभावात् नन
दस्तिपथि मोवा द्विविदेवे सुवापुनः सर्वप्रकृतिजे मुक्तं यदेभिः स्यात्त्रिभिर्गुणैरितिस्मृतेः सर्वत्रमिश्रसत्वस्यैवनिश्रयाच्च यदि
सर्वमिदं मिथ्या तर्हि नेवचोप्यसत्यं भवेत् सर्वकोटिप्रविष्टत्वात् अस्त्विति चेत्तर्हि सर्वस्य सत्यत्वोज्जीवनं वाधकाभावात् घट
भावाभावे घटसत्ववत् नहि सर्वं मिथ्या सर्वाभावप्रतिपादकं मद्वचनमपि मिथ्येति वदतः स्वरूपस्य वचने विरुद्धा [illegible]भव
तीति किंच सदेवेत्यत्र सन्मात्रांगीकारे सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते
इति स्मृतिविरोधः। तत्रास्ति त्वं निर्दोषत्वसमीचीनत्वप्रतिपादनात् यदि च न त्वयेदं सदेव सदेवभातीत्युच्येत तर्हि
अग्रे इति पदस्यासीदिति क्रियापदस्य च वैयर्थ्यं किंच तवाभिमतोध्यारोपापवादोप्यसंगतः कथमिति चेत् दृष्टांतदार्ष्टां
तिकयोर्वैरूप्यात् तत्र रज्ज्वधिष्ठाने तस्मिन्नज्ञानकल्पिताः सर्पादयः भ्रमनलं च तद्दृष्टान्ते तच्चरज्जुस्वरूपेण तिष्ठेत् अत्रमापि

ति अस्मलो ऽपि मिथ्यात्वप्रसंगात् तत्कुत इति चेत् तस्यापि दृश्यतेत्वग्रथाकुग्रा आत्मा वा अरे द्रष्टव्यः श्रोतव्य इति दृश्यत्वश्रुतः तदप्रतिपन्न
त्वात् नहि द्वितीयः रज्जुसर्पादौ दृश्यत्वमिथ्यात्वस्य तवानभिमतत्वात् प्रपंचेन व्यभिचार इति चेन्न यावद् दृश्यत्वमात्रस्य दोषजन्यत्वाभावा
त् न हि द्रष्टुः स्वप्नजं तमस्याद् दृष्टमिथ्यात्वे कश्चिदनुन्मत्तो मिथ्येति ब्रवीति अन्यच्च एकमेवाद्वितीयमित्यत्र नद्वितीयं सद् द्वितीयेन य
स्य द्वितीयं तद् द्वितीयं वा उभयत्रापि एकत्वरागीकारे तत्तीयादिप्रभावना स्यात् यद्यन्यमात्रे द्वितीयं सद् द्वितीयपदा वस्तुतो हि कपदस्य
वैयर्थ्यं अद्वितीयपदेनैव चरितार्थत्वात् न हि लोके द्वितीयत्वं पुरुषापेक्षया कश्चिद् ब्रूते किंतु समान एव तथात्वे तु नत्वस्मच्छा
स्त्रैकश्च दृश्यते इत्यादिश्रुतेर्भेद एव सिद्ध इति किंचाभेदाय की दृश्योऽभिमतः भेदाद् अन्यो भेदविरोधी भेदाभावो वा न प्रथम
द्वितीयो भेदानवगमात् तत्रापि किं प्रमाणं न किंचिदिति चिरं तदा स्मदिष्टसिद्धिरिति चिरं जीवतु भवान् यदि किंचिन्मानमुच्य
ते तदा तुल्य भेदापत्तिः मानाभावाद् भेदाभावे योऽवदस्तु तु देवानां प्रियः यदि भेदाभावे मानाभाव एवाभिमतस्तदा अप्रामाणि
कमेवेति यदि भेदाभावः स्वतः सिद्ध इति चेत्तर्हि भेदस्यापि स्वतःसिद्धत्वं किं न स्यात् प्रमाणस्य तु दोषत्वेन तस्य मानता नांगीक्रि
यते परीक्षकाणां चिन्ते तस्मात् प्रमाणस्य पारमार्थिकत्वमंगीकार्यं अन्यथा स्वाभिमतार्थासिद्धिः प्रमाणपारमार्थ्ये तु अपसिद्धा
न्त इत्युभयतःपाशा रज्जुः ननु एकत्वं तथा रसं नित्यमगोधवच्चयदि तिगंधादि निषेधः अन्यत्र सर्वगंधः सर्वरस इति गंधादि विधिः
श्रूयते न चैकस्मिन् वस्तुनि विधिनिषेधौ संभवतः अतः कार्यब्रह्मणि मनोमयत्वादि श्रुतेर्तु अप्राणत्वादिरिति चेत् तन्मंदं कथमि
ति चेत् विश्वमेवेदं पुरुषस्तद्विश्वम् उपजीवति सर्वस्य वशी सर्वस्येशानः न तस्येशे कश्चन तस्य नाम महद्यशः परात्परं यन्मह
तो महान्तं न तत्समश्चाभ्यधिकश्च दृश्यते न तत्समोऽस्त्यभ्यधिकः कुतोऽन्यः परं हि पुण्डरीकाक्षान्न भूतं न भविष्यति नारायणा
त्परो देवो न भूतो न भविष्यति सर्वाभासः रुद्रश्चाविद्यावेदितव्यो नित्यः सः कालकालो गुणी सर्वविद्यः साक्षी चेता केवलो निर्गुणः

तिरेव प्रमाणमिति चेन्न द्वासुपर्णा सयुजा सखाया तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीति ज्ञाज्ञौ द्वावजावित्यादिभे
दश्रुत्यनुपपत्तेरुक्त भेदश्रुतिरौपाधिकभेदविषयकमिति चेदभेदश्रुतेरप्यौपाधिकत्वं किं न स्यात् नियामकाभावात् प्रत्यक्ष
सिद्धो भेदोऽभेदश्रुत्याऽनूद्यते इति चेत् सोऽयं देवदत्त इत्यभेदस्यापि प्रत्यक्षसिद्धत्वादभेदश्रुतेरेवानुवादकत्वं किं न स्यात् एवं
च सति भेदाभेदयोः प्रत्यक्षसिद्धत्वेन श्रुतेर्गृहीतग्राहित्वादप्रामाण्यापत्तिश्चेति दुर्निवारोऽयं दोषः किं चातः प्रविष्टः
शास्ता जनानामित्यन्तर्यश्चेतनानां मतः प्रविश्य नियंतृत्वमुक्तं यदि ब्रह्मैव जीवभूतं तदा स्वस्य स्वयमेव नियंतेत्यादि
रात्मानं दहतीति वदसमंजसमेवेति न हि लोके राजा स्वस्य स्वयमेव नियंता किंतु स्वपरिकरस्यैवेति अपरं च पृथगात्मा
नं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेतीति श्रुत्या जीवेश्वरभेदज्ञानस्यैव मोक्षहेतुत्वश्रवणात् तदुक्ताभेद
ज्ञानस्य च गोष्ठीसमत्वमेव न च वाच्यम् आत्मानमेव लिप्सितारं देहादस्य पृथग्मत्वेति तस्यार्थ इति देहयदाद्याहार
प्रसंगात् तेनाविनावाक्यान्वये संभवति तदयोगात् चकारवैयर्थ्यापात् तमात्मस्थं येनुपश्यंति धीरास्तेषां शांतिः शाश्व
ती नेतरेषां अत्रांतरे ब्रह्मविदो विदित्वा लीना ब्रह्मणि तत्परा योनिमुक्ताः प्रधानक्षेत्रज्ञपतिर्गुणेशः क्षरं प्रधानममृता
क्षरं हरः क्षरात्मानावीशते देव एक इत्यादिषु सर्वात्मत्वसर्वपतित्वसर्वेशित्वादिना विलक्षणस्य परमात्मनः प्रतिपन्नत्वे
न तद्विरोधात् जुष्टस्ततस्तेनेति तृतीयांतनच्छब्दस्वारस्याभावात् देहविलक्षणस्यात्मनो ज्ञानानंतरं हेयदेहजुष्टत्वासंगतेः अमृ
तत्वमेतीति देहसहितमोक्षप्राप्तिप्रतिपादनासंभवाच्च अतस्त्वदुक्तं प्रत्यागमात्रमेवेति किंच दृश्यत्वेनापि चेतिवाक्यमवलं
ब्यत्वया जगतो मिथ्यात्वं प्रतिपाद्यते तत्र किं दृश्यत्वमात्रं मिथ्यात्वे हेतुरुत तद्विशेषो वा कश्चिदिति नाद्यः मयपक्षः तथास

तयास्वरूपप्रतिपत्तेः पर्यायांतरवैयर्थ्यापत्तिःस्यात् ननुव्यावर्त्यानामनन्तादीनामेकत्वेपितजतान्नतत्त्वा आकारभेदान्न
पर्यायान्तरवैयर्थ्यं भिन्नैश्चिन्न आकाराणांपरस्परभेदेतद्वतोपिभेदेनैवभवितव्यमितित्वयैवसाधितत्वात् तदभ्युपगमेचजडपरिच्छिन्नयोरसत्त्वव्यावृत्तत्वेनब्रह्मवद्वाधार्हत्वादद्वैतभंगः यदितत्तत्पदार्थव्यावृत्त्यवच्छिन्नस्वरूपपरत्वेनसत्यादी
नामेकार्थत्वमिष्यते न तथाव्यावृत्तीनांस्वरूपावच्छेदकत्वेनस्वरूपस्यसविशेषत्वप्रसंगाद्दिति किंचसत्यादीनांप्रवृत्तिनिमित्ताभावेसामानाधिकरण्यभंगः भिन्नप्रवृत्तिनिमित्तानांशब्दानामेकस्मिन्नर्थेवृत्तिःसामानाधिकरण्यमिति
4 हितल्लक्षणम् किंचसत्यपदार्थप्रतिपत्तिरसत्यपदार्थप्रतिपत्तिमपेक्षते असत्यपदार्थप्रतिपत्तिःसत्यपदार्थप्रतिपत्तिमपेक्षतेइतिपरस्प
राश्रयदोषः अपिचव्यावृत्तय उपलक्षणत्वेनविशेषणत्वेनवाब्रह्मलक्षयेयुः तत्राद्ये उपलक्ष्याकारस्वतन्त्रयाब्रह्मणःस
विशेषत्वं द्वितीयेपिविशेष्याविनाभूतधर्मस्यैवविशेषणत्वेन तद्वत्तयाससविशेषत्वमेवेति ननुज्ञानत्वानंतत्वयोःस
त्त्वानन्यत्वेनिमित्तभेदाभावेनपर्यायान्तरवैयर्थ्यं अन्यत्वेचासत्यत्वावश्यंभावेनसत्यत्वासत्यत्वयोर्विरोधात्सा
मानाधिकरण्यभंगरूपोदोषश्चभवतोप्यनिष्टइतिचेन्न नीलमुत्पलमित्यादौगुणजातिरूपयोरूपयोर्नीलानील
पदार्थयोरेकार्थसमन्वयदर्शनात्ब्रह्मण्यपिसत्यत्वासत्यत्वयोःसमन्वयेविरोधाभावात् तवतुजडव्यावृत्तिपरिच्छि
न्नव्यावृत्त्योरसत्यव्यावृत्त्यविशेषेण निमित्तैक्येसतिपर्यायान्तरवैयर्थ्यं विशेषेचनिमित्तभेदेनाखंडार्थपरत्वहानिश्चस्याद
वेति अतःसत्यत्वादीनांविशेषणत्वभंगीकार्यं अन्यथाअनन्तादिभ्योव्यावृत्तिर्नस्यात् व्यावर्तकाभावात् ननुविज्ञानमानं

अथ सगुणो निर्गुणो विष्णुर्ज्ञानगम्यो ह्युदाहृतः आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चन सत्त्वादयो न संतीशे यत्र च प्राकृता
गुणाः इत्यादिश्रुतिस्मृतीतिहासेषु अनंतकल्याणगुणगणविशिष्टस्य निखिलहेयप्राकृतगुणरहितस्यैकस्यैव नारायणस्य प्र
तिपादनात् तद्व्यतिरिक्तस्याप्रामाणिकत्वाच्च । ननु यतो वाचो निवर्तंते इति श्रुत्या ब्रह्मणो वाङ्मनसयोरविषयत्वमुक्त
मिति चेन्न आनंदं ब्रह्मणो विद्वानिति ब्रह्मानंदस्य ज्ञानविषयत्वश्रवणविरोधात् प्रमाणमात्राविषयत्वे ब्रह्मणो
ऽप्रामाणिकत्वेन तुच्छत्वापत्तेः । ननु ब्रह्मसाक्षात्कारपर्यंतं प्रमाणप्रमेयत्वादिकस्य पारमार्थिकत्वमंगीकुर्मो वयमिति चे
न्न श्रवणवेलायामेव ब्रह्मणो मिथ्यात्वेन श्रवणात् तस्यैव च मननात् तत्पारमार्थिकत्वांगीकारस्याकिंचित्करत्वात् ॥
न हि ध्रुवमनुष्यावाप्यजन्याग्निप्राप्तिर्भवति ध्रुवमनुष्येष्विव प्रमाणत्वात् विद्यास्नातना वेदा मदन्यापरिपालकाः मय्येव नि
श्रिताः पूर्वे मयि संति सदा न च नजाने तेन न सर्वे नीतिर्विदोपदेशरूपब्रह्मांडे ब्रह्माणं प्रति भगवत्या वेदप्रमाणस्य नित्य
त्वप्रतिपादनविरोधाच्च । ननु विज्ञानमानंदं ब्रह्म सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुतिभिर्ब्रह्मणो ज्ञानमात्रत्वमेव प्रतिपाद्यते
इति चेन्न विज्ञातारमरे केन विजानीयात् न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते सोऽश्नुते इत्यादिश्रुतिसूत्रविरोधापत्तेः
अत एतद्विरोधेनैव विज्ञानमानंदं ब्रह्मेत्यादेरर्थो वर्णनीयः सोपाधिकत्वनिरुपाधिकत्वयोः पूर्वमेव निरस्तत्वात् । ननु सत्यं
ज्ञानमनंतमित्यत्र सत्यादिपदैरनृतजडपरिच्छिन्नव्यावृत्त्वेन ब्रह्मण एकस्यैव प्रतिपादनात् तस्य निर्विशेषत्वं प्रतीयत इति चे
न्न सत्यादिपदानां तत्तत्पदार्थविरोधिव्यावृत्तिमात्रपरत्वे व्यावर्त्यबहुत्वेन व्यावृत्तीनामपि बहुत्वादिकार्थपर्यवसानासिद्धिः प्र
सत्यव्यावृत्तिरेव जडव्यावृत्तिः सैव परिच्छिन्नव्यावृत्ति [illegible] जडव्यावृत्तिः परिच्छिन्नव्यावृत्त

प्राणिजडत्वापत्तिः स्यात् अस्तु तावदपरे दोषास्तस्मिन् प्रसज्येरन् ततश्च निष्कलं निष्क्रियं शान्तं निरवद्यमित्या-
दिश्रुतिविरोधः किंच दृष्टान्तासंगतिश्च कथमिति चेत् तत्र घटादिरविशिष्टछायाया एव लक्षणया श्रुतत्वेन तन्तुकार्य्य-
प्रसुप्तादन्यत्वे तत्र परिणामादयः शरीरगता न तु चेतने तेन तु परमार्थाः अत्र तु ब्रह्मण्येव भ्रान्ते जगद्रूपेणाज्ञानभि-
ति नन्तु युक्तो दोषास्तस्मिन्नेव प्रसज्यन्ते अन्यच्च नेह नानेत्यत्र चिदचिन्मिश्रस्य सर्वस्य जगतो निषेधे नित्यो नि-
त्यानां चेतनश्चेतनानां ज्ञाज्ञौ द्वावजावीशानीशौ न जायते म्रियते वा विपश्चिदित्यादिभिः प्रतिपादितयोर्जीवे-
श्वरयोरपि निषेधादनित्यत्वप्रसंगस्ततश्च पूर्वोक्तश्रुतिविरोधापत्तिः हिरुक् नाना च वर्जने इति नानाशब्दस्य
वर्जनार्थेपि श्रवणात् अतो यन्निषेधः पूर्वोक्तश्रुत्यविरोधेन नेयः किञ्च निर्विशेषवस्तुनि प्रमाणमस्ति न
वा अस्ति चेत्तर्हि प्रमेयत्वेन तस्य प्रमाणप्रमेययोर्नित्यसंबंधाद्वैतभंगः नास्ति चेत्तर्ह्यप्रमाणत्वादनुपा-
देयत्वं स्यात् ननु स्वानुभवसिद्धमिति चेन्न तु स्वगोष्ठीसंकेतः इदमहमदर्शमिति सात्मसाक्षिकेवकेनचिद्विशेषेण
विशिष्टस्यैवानुभूयमानत्वात् अपरं च श्रवणादिसाधनेभ्यो यज्ज्ञानं तन्मोक्षसाधनमिति त्वयाभिमतं तद्ज्ञानं किमा-
लंबकमिति वक्तव्यं तत्त्वमस्यादिवाक्यजन्यमिति चेन्न विधिं विनैव तस्योत्पन्नत्वात् विधेरप्रयोजकत्वमिति चे-
त्तर्हि विवेकादिचतुष्टयस्य वैयर्थ्यं श्रोत्रेन्द्रियमेव श्रवणसाधनमपेक्षते चेत्तदा वेदान्तश्रवणस्यैवाधिकारः स्यात्

तुं ब्रह्म ज्ञानं ते ब्रह्म सर्वं खल्विदं ब्रह्म तदात्मानं स्वयमकुरुत इदं सर्वं यदयमात्मा नेह नानास्ति किंचनेत्यादिश्रुतिवाक्यैः स्फु
टस्यानन्तस्य चैतन्यमात्रब्रह्मणोऽविद्यया तिरोहिते स्वगतनानात्वं प्रतीतेति चेन्न तदसत् प्रकाशपर्य्यायस्य ज्ञानस्य तिरोधा
नाभावात् स्वप्रकाशस्वरूपस्य निरंशस्य तिरोधाने च स्वस्वरूपनाशप्रसंगात् । किंच सर्वस्य मिथ्यात्वे तत्त्वमस्यादिवाक्यजन्य
ज्ञानस्य बंधनिवर्तकत्वं न स्यात् अविद्याकार्यत्वात्तस्य स्वयमविद्यात्मकत्वादविद्याकल्पितेन ज्ञात्राश्रितत्वात्क
ल्पितात्कार्य्यात्त श्रवणजन्यत्वाद्वास्तवबंधनिवर्तकवाक्यजन्यज्ञानवत् । अत एव जीवन्मुक्तत्वमपि त्वदभिम
तं न स्यात् कारणाभावे कार्य्यस्याप्यनुपपत्तेः । ननु स्वाप्नगजादिभयात्पारमार्थिकप्रबोधदर्शनादविद्यात्मकस्यापि
वाक्यजन्यज्ञानस्य मिथ्यारूपस्य बंधनिवर्तकत्वसंभवात्तन्निवृत्तिपूर्वकपारमार्थिकः जीवब्रह्मणोः स्वरूपैकरूपो मो
क्षः प्रतिपन्नः इति चेन्न अदृष्टादृष्टतोज्ञानाद्भाव उपजायते इत्यादिप्रमाणात् स्वाप्नगजादिज्ञानस्यैव प्रबोध
कारणोऽजादिविषयस्य प्रबोधकारणाभावात् किंच घ्राणविषाणादेरिव स्वरूपेणासतः प्रपंचस्य न ब्रह्म
ण्यारोपसंभवः अन्यत्र सत एवान्यत्रारोपनियमात् प्रमाणपूर्व एव हि भिन्नभेदस्थः शुक्तिरजतादिषु नन्वारो
पः स्वविषयस्य प्रतीतिमात्रमपेक्षते न सत्त्वमपीति चेन्न प्रतीतेरप्यसतः घ्राणशृंगादेरिवासंभवात् । किं
च ब्रह्मैव स्वाविद्यया जगदाकारं जातमिति चेन्न हि जगतश्चिदचिन्मिश्रितत्वेन चिदचिदात्मकत्वदर्शनाद्धु

शा.
६

कल्पकैवकार्थं स्वतःसिद्धा सेति चेत्तर्हि द्वैतापत्तिः रूपोवत्त्रपातः प्रस्तानान्तरं कल्पकमिति चेत्तस्यापि कल्पकमन्वेष
णीयं तथा तस्यापीत्यनवस्थात् निरवयवस्य ब्रह्मणः आभासासंभव इति पूर्वमेवोक्तं अपि च मायाया जडत्वा
त्तस्यास्तत्त्वेनाभूततैः कार्यत्वासंभवपराहतं यदीश्वरस्य मायाकल्पितत्वं ब्रूषे तर्हि मायाविं वा ग्रहीष्यतां
स्यात्सर्वज्ञ ईश्वर इति वचनं वंध्यामे जननीतिवद्व्याहतमेव कार्यस्य कारणावशीकर्तृत्वासंभवात् नहि शुक्तौ कल्पितं र
6 जतं प्रभु रजतं वशीकरोतीति ननु रजतस्य जडत्वात् वशीकरणाभावः ईश्वरस्य तु चेतनत्वाद्वशेव मायावशीकरणत्व
मिति चेत्तर्हि जीवस्यापि मायावशीकरणत्वं स्यात् तस्यापि चेतनत्वात् मायाकल्पितत्वाविशेषाच्चेति यदप्युक्तं शान्तत्वा
दिरूपं चैतन्यमात्रमनुभूतिस्वरूपमात्मानमहंकारः स्वात्मस्थमेवाभिव्यनक्ति मुखमादर्शादिवदिति तदुपहास्यमेव स्वयंज्यो
तिष आत्मनो जडरूपाहंकाराभिव्यंग्यत्वस्यासंभवपराहतत्वात् तदुक्तं शान्तागारस्वादित्यमहंकारो जडात्मकः स्वयंज्योतिषमात्मा
नं व्यनक्तीति न पुनर्व्यनक्ति मदिति अन्यथा अनुभूतिस्वरूपस्यात्मनो हंकाराभिव्यंग्यत्वे तस्य अनुभूतित्वप्रसंगः स्यात् तदप्युक्तं व्यक्त
व्यंग्यत्वमन्योन्यं न चस्यात्प्रातिकूल्यतः व्यंग्यत्वेनानुभूतित्वमात्मनि स्याद्घटादिवदिति अतः सर्वेषां पदार्थानां स्वयंप्रकाशानुभू
तिविषयाधीनत्वात्तामेवाहंकारोभिव्यनक्तीत्युपहासास्पदमेवेति नन्वौपाधिकभेदविषयाभेदश्रुतयः पारमार्थिकाभेदविषया
श्चाभेदश्रुतयः श्रृंगीकार्याः अन्यथा एको देवः सर्वभूतेषु गूढः सर्वव्यापीत्यादिश्रुतिविरोध इति चेन्न विकल्पासहत्वात् किंस्व
भावतः स्वस्मादभिन्नं जीवमनुपहितं ब्रह्म जानाति न वेति न जानातीति चेत् तर्हि सर्वज्ञत्वहानिः जानाति चेत्तत्स्वस्मादभिन्नस्य जीवस्य
दुःखं सुखमिति ज्ञानं तो ब्रह्मणो हिताकरणादिदोषप्रसंगो निवार्यः जीवब्रह्मणोरज्ञानकृतोभेदस्ताद्विषयाभेदश्रुतिरिति चेदत्रा

६

तस्य सर्वेषां विप्रभ्रान्तत्वात् ततः अत एवांतःप्रमात्राधिकारित्वोक्तेर् संगतिः वर्णाश्रमादिव्यवस्थापिनः स्यात् ततश्च
शूद्राधिकार एव विरोधोऽपीति सर्वमसमंजसमेवेति यच्चोक्तं वृत्तिरूपे ज्ञाने जीवगताज्ञाने निवर्तिते तस्याः कत्वात् स्वयमपि न
श्यति यथा मलिनजले प्रक्षिप्तः कतकरेणुस्तत्कृतमालिन्यं निवर्त्य स्वयं न श्यतीति तन्न दृष्टान्तासंगतेः तत्र हि
कतकरेणुरपि च मालिन्यहारस्य जले कर्दमो तिष्ठति एवमत्रापि ब्रह्मणि कश्चिद्दोषवृत्तिरूपज्ञानस्याविद्याया
असत्त्वे सति चैतन्याविद्ययोः सांकर्यमेव नोच्छेदः दृष्टान्तासंगतिः यदुक्तं मायाभासेन जीवेशौ करोतीति श्रुतेः
जीवेशयोर्मायाकल्पितत्वं प्रतीयते इति तदप्यसमंजसं कथमिति चेत् स कारणं करणाधिपाधिपो न चास्य कश्चि
ज्जनिता न चाधिपः अतः परतरं नान्यत्किंचिदस्ति धनंजयेत्यादिश्रुतिस्मृतिभिः सर्वजगत्कारणत्वेन प्रतिपादित
स्येश्वरस्य कुत्रापि कार्यत्वे नाश्रुतत्वात् तज्जन्यत्वाधिपत्वयोरस्पष्टताभावप्रतिपादनाच्च अन्यथा नित्यो नि
त्यानां सत्यनादिरनंतश्च ज्ञाज्ञौ द्वावजावीशानीशावित्यादिश्रुतिभिर्नित्यत्वेनानाद्यनंतत्वेन चोक्तयोर्जीवेश्वरयोरा
दिमत्त्वेनानित्यत्वप्रसंगात् ततश्च तयोर्नित्यत्वप्रतिपादकश्रुतिस्मृतयोरनृतजल्पितजल्पनस्य स्यादिति किंच सा किं मा
श्रित्य जीवेश्वरौ कल्पयति न तावदनादित्वेनाश्रितत्वकल्पितत्वेन तयोः पश्चाद्भावित्वात् अतो ब्रह्माश्रितेति वक्तव्ये
ताहि एवमेव मायासद्वलितं ब्रह्मेति अहं पश्येति वदतो व्याघातः अपरं च मायाया अपि मिथ्यात्वाभिमतत्वात्तस्याः

प्रा.
७

पिचोत्तमः इत्यादिश्रुतिस्मृतिसूत्रविरोधः स्यात् किंच तस्यामेव श्रुतौ अभयं प्रतिष्ठां विंदतीति आधाराधेयभावेन
त· शरीरसंबंधस्य श्रूयते अनिरुक्तेऽनिलयनेऽपि सजातीयतया निर्दिष्टमप्राकृत यस्याव्यक्तं शरीरं योऽव्यक्तमंतरे संचरन्
यस्यात्मा शरीरं इ॰ प्राज्ञेनात्मनान्वारूढ उत्सर्जन्याति इत्यादि निर्गुणत्वेनैव प्रतिपादनात्· अनात्म्ये अप्राकृत शरीररहिते आदित्य
वर्णं तमसः परस्तात् न तस्य प्राकृता मूर्तिर्मांसमेदोस्थिसंभवेति श्रुतिस्मृती अनिरुक्ते अनंतमहिम्नि यतो वाचो
निवर्तंते अप्राप्य मनसा सह इति श्रुतेः महिम्नः पारमप्राप्येसर्यः अनिलयने अनाधारे मूलमनाधारमात्माधारो
निलोऽयमित्यादिप्रमाणात् इत्थं परमात्मनि यः प्रतिष्ठां विंदति सोऽभयं गतो भवतीति श्रुतेरर्थः ननु ब्रह्मवि
द्ब्रह्मैव भवतीति श्रुतिबलान्मोक्षे जीवब्रह्मणोः स्वरूपैक्यं प्रतीयते इति चेन्न तथा विद्वान् पुण्यपापे विधूय निरंजनः परमं
साम्यमुपैति परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते जगद्व्यापारवर्जं भोगमात्रसाम्यलिंगाच्च मम साधर्म्यमाग
ता इत्यादिश्रुतिसूत्रस्मृतिस्वारस्यभंगात्· तत्स्वरूपो मानवः स एतान् ब्रह्म गमयतीति वै द्युतेन पुरुषेणार्चिरादिमार्गेण
ब्रह्मप्राप्तिश्रवणविरोधादन्यथा मुक्तेः स्वरूपभंगोपगमात् मुक्तेः पुरुषार्थत्वात् तादृशमोक्षस्वरूपज्ञानानंतरं परीक्ष्यकोपि
तां मुमुक्षोर्मोक्षसाधनप्रवृत्त्यनुत्पत्तेश्च नहि कश्चिदनुन्मत्तः स्वनाशोऽस्त्वित्येवं यतते अतो ब्रह्मविद्ब्रह्मैव भवतीति
श्रुतेरर्थो मुक्तस्य ब्रह्मसाम्यप्रतिपादकश्रुत्याद्यविरोधेनैव संगमनीयस्तथा सति तत्र सिद्धांतभंगः उभयतः पाशा

पि विकल्पः किं तदज्ञानं जीवगतं ब्रह्मगतं वा जीवगतत्वे पूर्वोक्तो दोषः तस्यैवाज्ञानकल्पितत्वात् नहि शुक्तौ कल्पितरजतस्य म
ज्ञानं किंतु अध्यक्षपुरुषनिष्ठं ब्रह्मगतत्वे स्वप्रकाशस्वरूपस्य ब्रह्मणो ज्ञानसाक्षित्वं न तत्कृता जगत्सृष्टिश्च न संभवति अप्रसक्तत्वात्तस्य ननु
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं विजानीयादित्यादिभिर्भेदप्रपञ्चतोऽनर्थश्रवणात्क
थं द्वैतप्रपञ्चस्य मिथ्यात्वमिति चेन्न तत्र श्रुतिप्रपञ्चानामभिन्नत्वनिषेधेन सर्वस्य ब्रह्मकार्यत्वात् ब्रह्मात्मकत्वेनाब्रह्मात्मकस्य प्रपञ्चस्य त्यानिषिध्यमान
त्वात् अन्यथा सोऽकामयत बहु स्यां तदैक्षत बहु स्यां तन्नामरूपाभ्यां व्याक्रियतेत्यादिश्रुतिभिः स्वसंकल्पकृतनानात्वप्रतिपादनविरोधा
त् नहि आप्ततमेन वेदेन स्थिरचररूपेणैव प्रपञ्चो नानात्वं प्रतिपाद्य पुनस्तदेव निषिध्यते तथात्वे वेदस्यानाप्तत्वं स्यात् ततो
देवमात्रस्याप्रमाणत्वं स्यात् ननु आत्मैवेदं सर्वं सर्वं खल्विदं ब्रह्मेत्यादिना ब्रह्मात्मैकत्वज्ञानेनैवाविद्यानिवृत्तेस्तत्र युक्तेषु वेदुःखा
देर्मिथ्यात्वं प्रतीयत इति चेन्न दुःखं पुण्यापुण्यरूपकर्मनिमित्तं सुखदुःखयोस्तु भवस्य मिथ्यात्वाभावात् भवदभिमतैक्यज्ञानस्य परमा
र्थवस्तु विपरीतविषयस्य मिथ्यात्वेन बन्धविवृद्धेरेव कारणत्वात् अपि च भवदभिमतस्य बन्धनिवर्तकज्ञानस्यापि मिथ्यारूपत्वा
त्तस्य निवर्तकान्तरमन्वेषणीयं तत्सत्त्वे ज्ञानज्ञेययोर्नित्यत्वप्रसंगस्य भवदनिष्टत्वात् तस्य निजिहीर्षया निवर्तकान्तरस्या
प्यन्वेषणे अनवस्था पूर्वोक्ता ननु यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवति यदा ह्येवैष एतस्मिन्नु
दरमन्तरं कुरुते अथ तस्य भयं भवतीति श्रुतेर्भेदं कुर्वतो भयश्रवणात् कथं जीवब्रह्मणोर्भेदाग्रह इति चेन्न तद्भेदस्वरूपानभिज्ञ
त्वविजृम्भितं तथाहि अत्र स्वनिष्ठभेदो निराक्रियते न तु श्रुत्युक्तः शेषशेषिभावरूपो भेदः अन्यथा ज्ञाज्ञौ सहयुनादिरनन्तश्च
पृथग्घि परमात्मनः भेदव्यपदेशा [illegible] गुणभेदानिर्देशात् यस्मात्क्षरमतीतोहमक्षराद

त्स्नुरिति॰ ननु यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति विदुषोऽत्रैवामृत
त्वश्रुतेः कथं वैद्युतेन पुरुषेण ब्रह्मप्राप्तिरूपपद्यत इति चेन्न एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन
रूपेणाभिनिष्पद्यत इति श्रुतेश्चैकशतं च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेति ऊर्ध्वमेकः स्थि
तस्तेषां यो भित्त्वा सूर्यमण्डलं ब्रह्मलोकमतिक्रम्य तेन याति परां गतिमित्यादिश्रुतिस्मृतिविरोधात् अत एतदविरोधे
8 नैवमस्याः श्रुतेरर्थो वर्णनीयः ननु भवत्वेषां श्रुतीनां सालोक्यादौ सार्थक्यं सायुज्यरूपे मोक्षे तु ब्रह्म विद्वान् ब्रह्मैव भवतीति श्रुतेः
स्वारस्यमिति चेन्न॰ धात्वर्थानिरुक्तिविरोधात् सह युनक्तीति सयुक् सयुजो भावः सायुज्यमिति शाब्दिकोक्तेः सोऽश्नुते सर्वान्कामान्सह ब्रह्म
15 णा विपश्चितेत्यस्या अनुगुणे नैव भोगसाम्यस्वारस्यात् अन्यथा आदित्यस्य सायुज्यं गच्छतीति॰ एतासां देवतानां सायुज्यं ग
च्छतीत्यादिश्रुतिप्रतिपादितस्य तत्तद्देवतास्वरूपैक्यप्रसंगात् सायुज्यं प्रतिपन्ना यतीवभक्तास्तपस्विनः किंकरा मम ते सर्वे भ
वन्तीति निरूपद्रवाः ... पादुके वायत ... आदयप्रवासः सायुज्यं मोक्षः समभिधीयते इत्यादिवाक्यैः स्पष्टं भोगसाम्यप्रतिपाद
केऽविरोधाच्च ... ब्रह्मैवेति श्रुतेर्मुक्तस्य ब्रह्मसाम्य एव स्वारस्यमिति सर्वं दिव्... तेनेति एवं सह ...
निष्ठति ... अयं न्यायेन दिङ्मात्रमुक्तमिति आलोऽस्य देशिक ... विचार्य ... दूषणानां प्रमतं ... केवलो ...
दर्शने॰ इति श्रीमन्नारायणनलिनद्विरेफायमाणदीनभक्तेषु ... श्रीमदर्हस्कराचार्याणां चरणारविन्दमकरन्दे ... श्रीनिवासेन विर
चिता पाषण्डतरुधगीसमाप्तिमगात् । श्रीरामो विजयतेतराम् ।। ७७ ।।

शतद्रुशारी

१